त्रैमासिकी / सप्टम्बर् २०२६

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥

## परिज्ञानलहरी विशेषाङ्कः-२







मङ्गलं वृषभध्वजाय मङ्गलं गरुडध्वजाय ।
मङ्गलं लक्ष्मीवराय मङ्गलं गङ्गाधराय ॥

सप्टम्बर् २०२६

# अनुक्रमणिका


| | |
|---|---|
| **गुरूपदेशः** | १ |
| **निवेदनम्** | १ |
| **चिन्तनम्** | २ |
| **सुभाषितम्** | ३ |
| **पक्षिमित्राः भवाम** | ४ |
| **परिज्ञान-तरङ्गिणी** | ६ |
| श्रीमत्-परिज्ञानाश्रम-वस्तुसङ्ग्रहालयः | |
| **बालरञ्जनी** | ९ |
| महाकालेश्वरः | |
| शब्दपटः | १० |
| **मुग्धानुरागः** | ११ |
| **हास्यकणिका** | ११ |
| **रुचिरा** | १२ |
| सुरनोळी (मधुकोषः) | |
| **वार्ता गीर्वाणप्रतिष्ठातः** | १३ |
| **संस्कृतयोगः** | १३ |
| **उत्तराणि** | १४ |

## ॥ गुरूपदेशः ॥



**दशमगुरु-परमपूज्य-**
**श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।**

वयं भगवन्तं श्रीकृष्णं प्रार्थयामहे यत् वयम् अहंवृत्त्यायां निमज्जिताः भवेम या सत्यत्वेन आनन्दरूपिणी अस्ति । सर्वे जनाः सुखाय एव स्पृहयन्ति परन्तु सुखं न किमपि वस्तु यत् सम्पादितव्यम् । तत्तु वस्तुतः अस्मासु एव वर्तते ।



**एकादशगुरु-परमपूज्य-**
**श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।**

अहङ्कारविहीनं भवितुम् अशक्यम्। भवता केवलम् अहङ्कारस्य तामसिकत्वात् उन्नयनं करणीयम् । एषः अहङ्कारः राजसिकगुणेन दग्ध्वा सात्त्विकः करणीयः येन शिथिलः जातः सः अहङ्कारः ईश्वराय स्वकार्याय प्रयोक्तुं सुकरः भवेत् । सा  एव शरणागतिः। ईदृश्यां शरणागत्यां पवित्रीकरणं भविष्यति ।

गुरूपदेशानुवादः - अर्चना काप्राडक , चेन्नई

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

मङ्गलूरुनगरात्  चत्वारिंशत्किलोमीटरदूरं नगरजीवनस्य  कोलाहलात् दूरं वर्तते विट्टल-नाम प्रासादिकग्रामः। दोलायमानैः नारिकेल-पूगवृक्षैः हरितैः कदलीवनैश्च परिवृतः अयं ग्रामः निसर्गरम्यतायाः आलयः इव भाति। अस्यां पावनभूम्यां सारस्वतसमाजस्य प्राचीनतमेषु देवालयेषु अन्यतमः श्रीमदनन्तेश्वर-देवालयः विराजते। अस्मिन् पुण्यक्षेत्रे अस्माकं परमपूज्य-सद्योजात-शङ्कराश्रम-स्वामिनः सम्प्रति प्रवर्तमाने परिज्ञानलहरीमहोत्सवे चातुर्मासव्रतम् आचरन्तः सन्ति ।

श्रीमदनन्तेश्वरदेवस्य पावनसन्निधौ प्रतिदिनं विधीयमानैः पूजा-पठन-होम-हवनैः , गुरुवर्याणां दिव्यवाण्या , तेषां दिव्यकरकमलाभ्यां क्रियमाणेन शिवपूजनेन  देवीपूजनेन  च समुपजनितैः आध्यात्मिकस्पन्दनैः समुच्छलन्ती परिज्ञानलहरी साधकान् आनन्दामृतसागरे निमज्जय्य कृतकृत्यान् करोति ।

**योऽनुकर्तुं विभुं चक्रे विश्ववस्त्वालयङ्करम् ।**

**वस्त्वागारं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥**

अस्माभिः सर्वैः विदितम् अस्ति एव यत् परमगुरु-परमपूज्य-परिज्ञानाश्रम-स्वामिभिः लोककल्याणाय याः योजनाः परिकल्पिताः समारब्धाः च ताः परमपूज्य-सद्योजात-शङ्कराश्रमस्वामिभिः गुरुसङ्कल्पः इति भावनया

सश्रद्धं समर्पणभावेन पुनः प्रवर्तिताः अनुवर्तिताः च । एतासु परियोजनासु श्रीमत्-परिज्ञानाश्रम-वस्तुसङ्ग्रहालयः अद्वितीयं विशिष्टं च स्थानं भूषयति यस्य परिचयः अस्मिन् अङ्के प्रस्तुतः अस्ति। प्राचीनवस्तूनि केवलं भूतकालस्य स्मृतयः न । तत्र स्थितं प्रत्येकवस्तु स्वकीयां कथां बिभर्ति तथा अस्माकं परम्परायाः संस्कृतेः च साक्ष्यं वहति । श्रीवल्लीं समागच्छद्भिः सर्वैः श्रीमत्-परिज्ञानाश्रम-वस्तुसङ्ग्रहालयः अवश्यं द्रष्टव्यः तथा तस्मात् लभ्यमानः अद्वितीयः आनन्दः प्रत्यक्षम् अनुभवितव्यः ।

परमगुरु-परमपूज्य-परिज्ञानाश्रम-गुरुवर्यान् तथा परमपूज्य-सद्योजात-शङ्कराश्रम-गुरुवर्यान् हृत्पूर्वकं सादरं प्रणम्य तेषां चरणकमलयोः एतम् अङ्कं सहर्षं सविनयं समर्पयामः ।

सम्पादिका

## चिन्तनम्

**– सुजाता हल्दीपुर , मुम्बई**

अस्मिन् वर्षे गीर्वाणप्रतिष्ठया आयोजिते संस्कृतशिविरे ' इदं न मम ' इति विषयम् अधिकृत्य चिन्तनम् अभवत् । नैकैः स्वविचाराः प्रकटिताः । विविधविचाराणां प्रस्तुतिः जाता । अस्य चिन्तनस्य सारांशः अधः दीयते ।

★ **' इदं न मम ' कदा श्रूयते एतत् ?**

यज्ञसमये हवनसमये च यदा आहुतिम् अर्पयामः तदा एतस्य प्रकर्षेण उच्चारणं भवति। किं किम् अर्पयामः हुताशने ? घृतं , फलानि , वस्त्रम् इत्यादीनि । अनन्तरं वदामः इदं न मम इति । एतस्य उच्चारणं न केवलं यज्ञसमये एव कर्तव्यं किन्तु अस्माकं सर्वाणि कार्याणि यज्ञवदेव भवेयुः।

यथा भगवता श्रीकृष्णेन उक्तम् -

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥

★ **एतस्मिन् संसारे किं किं मम इति वयं चिन्तयामः ?**

बाह्यवस्तुषु प्रियजनाः परिवारः मित्राणि गृहं प्रियवस्तूनि इत्यादीनि न वा ! किन्तु एतानि वस्तूनि ' न मम ' इति मनःपूर्वकं चिन्तयितुं शक्यते किम् ? एतैः विना जीवनं शुष्कम्। अस्माकं भावनाः एतैः दृढतया बद्धाः। तर्हि एतैः सह कीदृशः व्यवहारः क्रियेत ! भगवान् रामकृष्णपरमहंसः उक्तवान् - " अस्माभिः धनिकस्य गृहे कार्यं कुर्वती सेविका इव भवितव्यम्। यथा सा सर्वं प्रीत्या आत्मीयतया करोति किन्तु हृदि सा जानाति यत् एतत् केवलम् उदरभरणार्थम् । न एतन्मम "। तथैव सर्वाणि कर्माणि प्रेमपूर्वकं दक्षतया कर्तव्यानि किन्तु मनसि भावः जागृतः भवेत् यत् एतत् न मम। एषः संसारः भाटकगृहम् इव मत्वा संसारे

व्यवहर्तव्यम् । तस्य विषये मोहः न बाधते यदि ज्ञायते यत् एतत् न मम। यावत् देहः अस्ति तावदेव एतैः सह सम्बन्धः। यदा मोहः सम्बन्धः च त्यज्येते तदा समर्पणं सहजं भवति ।

एतानि तु बाह्यवस्तूनि। एतेषाम् अपेक्षया आन्तरिकवस्तूनां त्यागः कठिणः।

★ **कानि कानि आन्तरिकवस्तूनि मम इति वयं चिन्तयामः ?**

कर्तृत्वं तथा भोक्तृत्वम्– अहं करोमि, अहं जानामि, अहम् इच्छामि इति अहङ्कारः। तर्हि एतस्मात् मोहात् कथं मुक्तिः प्राप्येत? अस्माभिः ज्ञातव्यं यत् यद्यत् अहं करोमि इति चिन्तयामि तत् सर्वं गुरुशक्तिः मया कारयति। तया विना किमपि न शक्यम्। अहं तु केवलं यन्त्रवत् निमित्तमेव। यत्किमपि अस्माभिः क्रियते तदा तस्य विषये अनासक्तभावः आचरितव्यः । गुरुवर्यैः उक्तम् – " उदासीनः इत्युक्ते उत् आसीनः, संसारद्वन्द्वात् उपरि उपविष्टः "। यः यद्यपि संसारे नियुक्तः तथापि तस्य मनसि ममत्वं न भवति । केवलं साक्षीभावेन सर्वं पश्यति । केनापि साधुना उक्तम् – " मनसि समर्पणभावरूपी तैलं लेपयित्वा भवाब्धौ नियतकर्माणि करोतु "।

★ **कस्मै समर्पयामि ?**

तस्यै गुरुशक्त्यै या एव सर्वं कारयति। यदि सा एव सर्वं कारयति तर्हि समर्पणमपि तया एव कारयितम् । अहं समर्पयामि इति चिन्तनमपि निराश्रितम्।

यदि इदं न मम इति अस्माकं समर्पणं न केवलं शाब्दिकं किन्तु अर्थपूर्णं कर्तुं प्रयतामहे तर्हि अस्माकं गुरुचरणयोः प्रार्थना भवेत् –

'उर्वारुकमिव बन्धनात् मृत्योर्मुक्षीय मामृतात् ॥'

## सुभाषितम्

**– पवन काप्राडक , चेन्नई**

**गङ्गा पापं शशी तापं दैन्यं कल्पतरुस्तथा ।**
**पापं तापं च दैन्यं च हन्ति सज्जनसङ्गमः ॥**

**भावार्थः –**

गङ्गास्नानेन सर्वाणि पापानि नश्यन्ति , चन्द्रकिरणैः शरीरतापः दूरं गच्छति, कल्पवृक्षः मनुष्यस्य दरिद्रतां दूरीकरोति । परन्तु साधूनां दर्शनेन तु एतत् त्रयम् – पापं , तापं , दैन्यं च – नश्यति ।

गङ्गायाः, चन्द्रस्य, कल्पवृक्षस्य च सामर्थ्यं तु एकस्मिन्नेव विषये अस्ति । किन्तु सज्जनपुरुषाणां सहवासेन बाधात्रयं परिहृतं भवति। तादृशं सामर्थ्यं सत्सङ्गे भवति । सज्जनसमागमः अस्ति किल सर्वसमावेशकः।

# पक्षिमित्राः भवाम ।

**– शिल्पा मुद्गर, मुम्बई**

अपि भवन्तः कदाचित् कस्यचित् पक्षिणः मधुरेण प्रभातगानेन प्रबोधिताः ? पक्षिप्रेमिणां कृते एतादृशात् रमणीयतरः अनुभवः अन्यः कः स्यात् ?

प्रथमवारं यदा अहं कस्यापि पक्षिणः मञ्जुलस्वरेण सुप्तप्रबुद्धा तदा 'कोऽयं खगः महति प्रत्यूषे मम वातायनात् बहिः उपविश्य एतावत् मधुरं गायति?' इति कुतूहलेन अहं झटिति उत्थाय वातायनस्य समीपं गतवती। किन्तु समयः सार्धचतुर्वादनम् अतः अन्धकारः एव आसीत्। तेन सः पक्षी मया न दृष्टः।

अन्येद्युः तस्मिन्नेव समये पुनः सः मनोहरस्वरः श्रुतः। महदाश्चर्यं नाम सः पक्षी एकामेव स्वरमालिकां मुहुर्मुहुः कूजन् आसीत् , यथा कश्चित् गायकः गायनाभ्यासं करोति । एवम् उपविंशनिमेषान् यावत् अगायत् सः, परं प्रकाशाभावात् अहं तं खगं तद्दिनेऽपि न दृष्टवती । ततः प्रतिदिनं मम गायकस्य दर्शनं भविष्यति इति आशया अहं प्रातःकाले शीघ्रम् उत्तिष्ठामि स्म । मम अतिथिः अपि नियतरूपेण उपस्थितः भूत्वा स्वस्य प्रातःकालीन-सङ्गीताभ्यासस्य श्रवणसौभाग्यं मह्यं ददाति स्म। सः एव समयः, तदेव स्थानम् , सा एव स्वरमालिका – ननु विस्मयकारकम्। तस्य मधुरस्वरेण दिवसस्य प्रारम्भे जाते अहमपि आदिनं प्रसन्ना उत्साहपूर्णा च भवामि स्म। एवं नैकानि दिनानि गतानि परं तस्य दर्शनं दुर्लभमेव आसीत् ।



अन्ते तादृशमेव मधुरकूजनं कुर्वन् खगः यदा मध्याह्ने मया दृष्टः तदा अन्तर्जाले अन्विष्य अहं ज्ञातवती सः पक्षी **ओरिएण्टल् मॅग्पाय्-रॉबिन्** इति !

ओरिएण्टल् मॅग्पाय्-रॉबिन् ( Oriental Magpie Robin, शास्त्रीय-नाम- Copsychus saularis ) फ्लायकॅचर-कुलस्य एकः लघुः, चपलः, गायकपक्षी अस्ति। तस्य सर्वाधिकं मनोहरं वैशिष्ट्यम् अस्ति तस्य स्वरः। तेन **श्रीवदः** इति तस्य संस्कृतनाम यथार्थमेव। प्रजननकाले नरपक्षिणः सूर्योदयात् बहुपूर्वमेव गानम् आरभन्ते। ते प्रायः उन्नतां शाखां वा अन्यत् प्रमुखं स्थानं चिन्वन्ति, यतः तेषां स्वरः दूरं गन्तुं शक्नोति। जटिलानि वैविध्यमयानि च तेषां गानानि स्वसहचारिणीम् आकर्षयितुं, स्वप्रदेशस्य घोषणां कर्तुं तस्य रक्षणं च कर्तुं भवन्ति।

संस्कृतेन दहियकः, कालकण्ठ-कलविङ्कः इति अन्यनामभिः अपि ज्ञातस्य अस्य लघुखगस्य दीर्घता प्रायः १८–२१ सेण्टिमीटरमिता भवति । नरस्य पिच्छानि कृष्ण-श्वेतवर्णानि आकर्षकाणि भवन्ति,

स्त्री सामान्यतः धूसर-श्वेतवर्णा च भवति । अयं पक्षी भारतीय-उपमहाद्वीपे आग्नेय-आशियादेशेषु च विस्तरेण दृश्यते। उद्यानेषु, कृषिक्षेत्रेषु , ग्रामेषु , मानवीयवसतीनां समीपेऽपि च सः सहजतया निवसति। श्रीवदः मुख्यतः कृमिकीटकान् खादति। सः प्रायः भूमौ स्थितेषु वनस्पतिषु आहारम् अन्विष्यति । कदाचित् सः पुष्पमधु अन्यान् लघुजन्तून् चापि खादति ।



नीडनिर्माणकार्यं पक्षिणी करोति। सा वृक्षस्य कोटरे, विवरे, भित्तेः छिद्रे वा अन्यस्मिन् सुरक्षितस्थाने वा तृणैः, मूलैः, मृदुपदार्थैः आस्तरणं रचयति । सा सामान्यतः त्रीणि वा पञ्च वा अण्डानि स्थापयति स्वयमेव ऊष्मायते च। अण्डेभ्यः शावकेषु निष्पन्नेषु तु उभौ माता-पितरौ तेषां कृते आहारम् आनयतः।

श्रीवदस्य स्वकीया स्वरभाषा एव अस्ति! तस्य मधुरं प्रभातगानम् अस्मान् आनन्दयति एव, अपरञ्च सः सङ्कटसूचनाय, भयस्य प्रकाशनाय च अन्यान् स्वरान् अपि प्रयुङ्क्ते । यदा सः मार्जारं, सर्पं वा व्याडखगं पश्यति तदा स्वपुच्छं शीघ्रम् ऊर्ध्वमधश्च चालयन् किञ्चित् " क्रश्श् " अथवा " च्रर " इव सङ्कटसूचकस्वरेण अन्यान् पक्षिणः सावधानान् करोति। अयं पक्षी दीर्घं, स्पष्टम् ऊर्ध्वगामिनं च शीश्कारसदृशं स्वरम् अपि करोति। सः "स्वीईईई!" इव श्रूयते। अयं सम्पर्कसूचकः स्वरः अस्ति । घनेषु गुल्मेषु वनस्पतिषु च आहारम् अन्विष्यन् सः अस्य स्वरस्य उपयोगेन सहचराय स्वस्य स्थानं ज्ञापयति। यदि अन्यः नरपक्षी तस्य प्रदेशे प्रविशति, तदा सः शीघ्रान् तीक्ष्णान् च टकटकसदृशान् स्वरान् कृत्वा प्रविष्टं पक्षिणं सावधानं कर्तुं तं च ततः निष्कासयितुं प्रयत्नं करोति। नूनं श्रीवदः न केवलं सुन्दरः गायकपक्षी, अपि तु अत्यन्तं रोचकतया निरीक्षणीयः पक्षी अपि अस्ति ।

अद्यापि यदा यदा वृक्षशाखायां वा गुल्ममध्ये वा श्रीवदं पश्यामि, तदा तेन सह मम प्रथमपरिचयः स्मृतिपथे आगच्छति । अन्धकारे श्रुतात् एकस्मात् रहस्यमय-मधुरस्वरात् आरब्धः अनुभवः कस्यचित् अद्भुत-लघुपक्षिणः परिचयं दत्तवान् । अहं मन्ये यदि वयं क्षणमात्रं विरम्य, सावधानतया शृणुमः, सूक्ष्मतया पश्यामः च, तर्हि साधारणं प्रभातमपि प्रकृतेः एकः सुन्दरः पाठः भवितुम् अर्हति ।




# परिज्ञान-तरङ्गिणी

## श्रीमत्-परिज्ञानाश्रम-वस्तुसङ्ग्रहालयः

**– कृष्णानन्द मङ्कीकर , मुम्बई**







**“योऽनुकर्तुं विभुं चक्रे विश्ववस्त्वालयङ्करम् ।**
**वस्त्वागारं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥”**

इमं श्लोकं वयं प्रतिदिनम् अस्माकं श्रीचित्रापुरमठस्य दशमपीठाधीश्वराणां परमगुरुवर्याणां परमपूज्यानां श्रीमत्परिज्ञानाश्रमस्वामिनां (तृतीयानां) स्तवनसमये गायामः। सत्यमेवेदं यत् विगते काले यदा संसाधनानामभावः आसीत् , यदा सम्पूर्णसमर्थनस्य अभावात्सर्वथा स्वयमेव कार्यं करणीयमासीत्, तदा सर्वशक्तिमन्तं परमेश्वरमनुसृत्यैव गुरुवर्यैः वस्तुसङ्ग्रहालयस्य निर्माणमनुष्ठितम् । तज्ज्ञात्वा वयमतीव चकिताः विनम्राश्च भवामः ।

शिरालीस्थाने स्वयंसङ्गृहीतानां विविधपुरावस्तूनां प्राचीनस्मृतिचिह्नानां च, तथा श्रीचित्रापुरमठे सुरक्षितानां बहुमूल्यवस्तूनां प्रदर्शनार्थं वस्तुसङ्ग्रहालयस्य स्थापनं भवेद् इति परमपूज्यपरिज्ञानाश्रमस्वामिनां चिरकालपोषितः मनोरथः आसीत् । तेषां दूरदर्शी सङ्कल्पः २००८ तमस्य वर्षस्य डिसम्बरमासस्य २९ तमे दिने “श्रीमत्-परिज्ञानाश्रम-वस्तुसङ्ग्रहालयः” इत्यस्य उद्घाटनेन साकारतां प्राप्तः। अद्य मठभवनात् अनतिदूरस्थितः सः सङ्ग्रहालयः चित्रापुरसम्प्रदायस्य समृद्ध-धार्मिक-सांस्कृतिक-परम्परायाः एकं सजीवं साक्ष्यं भूत्वा प्रकाशते ।

बाल्यावस्थायामेव रवीन्द्रनामाभिधानानां तेषां पत्रप्रेषण-मूल्याङ्कानां (postal stamps) तथा च पुरातननाणकानां सङ्ग्रहणे रुचिविशेषः आसीत् । कुमारावस्थातः ते पुरातत्त्वशास्त्रे (archeology) विशेषामभिरुचिं धारयामासुः ।

परमपूज्यश्रीमत्परिज्ञानाश्रमस्वामिनः (तृतीयाः) १९६६ तमे वर्षे श्रीचित्रापुरमठस्य तथा चित्रापुर-सारस्वत-समाजस्य गुरुपदं प्राप्तवन्तः। १९६६ तः १९९१ पर्यन्तम् अस्माकं मठस्य आधिपत्यं ते भूषितवन्तः। संन्यासग्रहणानन्तरम् अपि पुरातत्त्वविषये इतिहासविषये च तेषां प्रीतिः प्रवृत्ता वृद्धिङ्गता च । तैः विग्रहाः, हस्तलिखितग्रन्थाः तथा विविधानि पुरावस्तूनि सङ्गृहीतानि । तेषु बहूनि वस्तूनि तैः स्वयमेव समुपाहृतानि आसन् ।

अस्माकं पूर्वजैः स्थापिताः अनेके देवालयाः अस्माकं मठस्य समीपस्थे परिसरे तथा च किञ्चिद्दूरेऽपि स्थितेषु ग्रामेषु आसन् । किन्तु तत्र न कोऽपि नित्यविनियोगान् कर्तुमुद्युक्तः आसीत् न वा सुचारुरूपेण व्यवस्थापनं कर्तुं समर्थः येन ते देवालयाः उपेक्षितावस्थां गताः । तस्मात् तत्रस्थाः मूर्तयः अपि उपेक्षिताः अभवन् । कुत्रचित् समाजविघातकसूत्रैः तान् चोरयित्वा विक्रयार्थम् अन्यदेशं नीताः । यदा गुरुवर्यैः वस्तुस्थितिः ज्ञाता तदा तैः अस्माकं संस्कृति-संरक्षणार्थं ते विग्रहाः, अनेकानि निरस्तानि अत्र-तत्र विकीर्णानि च पुरातनवस्तूनि अन्विष्य शिरालीसंस्थाने आनीतानि । नैकानि वर्षाणि यावत् ते विग्रहाः तत्र एव सुरक्षिताः आसन् ।

अनन्तरं वर्तमानपीठाधीश्वरैः परमपूजनीयैः श्रीमत्सद्योजातशङ्कराश्रमस्वामिवर्यैः स्वेषां दूरदर्शिनां गुरूणां पुण्यस्मृत्यर्थं श्रद्धाञ्जलिरूपेण 'श्रीमत्-परिज्ञानाश्रम-वस्तुसङ्ग्रहालयः' नाम भवनं श्रीचित्रापुरसंस्थाने विधिवत् प्रतिष्ठापितम् । चित्रापुरसारस्वतमहासभायाः स्थायीसमितेः तत्कालीनाध्यक्षः प्रख्यातः वित्तविशारदश्च स्वर्गीयः श्रीमान् विनोद-यन्नेमडी-महोदयः स्वपितृमातृस्मृत्यर्थम् अस्य सङ्ग्रहालयभवननिर्माणे उदारमवदानम् अकरोत् ।









बहुदुर्लभ-पुरावस्तुभिः समृद्धः एषः सङ्ग्रहालयः परमपूज्यानां श्रीमत्परिज्ञानाश्रमस्वामिनां सङ्कल्पस्य चिरस्थायी स्मारकमिव विराजते। स्वामिनां ध्येयं केवलं भक्तजनानाम् आध्यात्मिकमार्गदर्शनं नासीत्, अपि तु तान् स्वीयसंस्कृतिपरम्परया पैतृकसम्पदा च पुनः सम्बद्धान् कर्तुम् अपि आसीत्। यतो हि पूर्वजैः प्रदत्तं सांस्कृतिकवैभवं न विस्मर्तव्यमिति गुरुवर्याणां दृढा भावना आसीत् ।


अयं वस्तुसङ्ग्रहः प्रारम्भे केवलं प्राचीनविग्रहपुरावस्तूनां च सङ्कलनमात्रम् आसीत् । सः कालक्रमेण पूर्णविकसितस्य वस्तुसङ्ग्रहालयस्य रूपमधारयत्। अद्य अत्र चित्रापुरसारस्वतगुरुपरम्परायाः उद्भवः, प्रत्येकस्य पीठाधीश्वरस्य कार्यकालः, तेषां योगदानम्, तथा समुदायस्य त्रिशताधिकवर्षाणाम् आध्यात्मिकयात्रायाः साक्षिभूतानि असङ्ख्यानि विग्रहपुरावस्तूनि च सुसम्बद्धरूपेण प्रदर्श्यन्ते। प्रतिवर्षं चैत्रमासे अस्माकं श्रीचित्रापुरमठस्य रथोत्सवः भवति। अस्य रथस्य उपस्तम्भः अत्रैव स्थापितः अस्ति यस्य दर्शनमपि अभ्यागताः प्राप्नुवन्ति।



अद्यतने काले अनेके पर्यटकाः कर्णाटकसमुद्रप्रदेशं द्रष्टुमागच्छन्ति । ते श्रीचित्रापुरसंस्थानमपि आगच्छन्ति । एनं वस्तुसङ्ग्रहालयं दृष्ट्वा मुदिताः जनाः प्रशंसापूर्णवचनानि अभ्यागतपुस्तिकायां लिखन्ति ।

एषः सङ्ग्रहालयः न केवलं वस्तूनां निक्षेपागारम् अपि तु समुदायस्य इतिहासस्य, संस्कृतेः, आध्यात्मिकपरम्परायाश्च जीवन्तं साक्षिरूपं वर्तते इति ध्रुवम् । भवन्तोऽपि आग्रहेण एनं वस्तुसङ्ग्रहालयं दृष्ट्वा अस्माकं परम्परायाः पुनरनुभूतिं करिष्यन्ति इति आशास्महे ।

शुभं भवतु ।






बालरञ्जनी

## महाकालेश्वरः

**– सुधा कार्नाड , बेङ्गलूरु**



आसीत् पुरा अवन्ती नाम्ना एका रम्या नगरी । सा नगरी अद्यतनेषु दिनेषु ' उज्जैनी ' इति नाम्ना प्रख्याता अस्ति । वेदप्रियः नामधेयस्य एकः शिवभक्तः ब्राह्मणः एतस्यां नगर्याम् उषितवान् । स्वस्य चतुर्भिः पुत्रैः सह एषः ब्राह्मणः प्रतिनित्यं शिवस्मरण-जप-तप-याग-पूजादिषु कालं यापयति स्म । सुखसमृद्धिः अवन्तीनगर्यां सदैव भवति स्म ।

तस्मिन् एव काले दूषणः नाम एकः असुरः ब्रह्मदेवात् प्राप्तवरः आत्मानम् अतीव बलशालिनं मन्यते स्म। जगति कोऽपि मम प्रतिरोधं कर्तुम् असमर्थः इति चिन्तयन् सः देवान् नृपान् च पीडयति स्म ।  तं प्रति सर्वत्र  तस्य भटैः भीतिः प्रसारिता ।

किन्तु शिवचिन्तने मग्नाः वेदप्रियः तथा तस्य पुत्राः भीतिरहिताः आसन्। एतद् ज्ञात्वा रत्नमाला-पर्वते स्थितः दूषणः क्रुद्धः जातः । " देवाः महान्तः राजानः चापि मत्तः भीत्या कम्पन्ते। तर्हि एते मानवाः किमर्थं शिवस्य ध्यानं कुर्वन्ति? तैः शिवभक्तिः त्यक्तव्या  नोचेत् ते हन्तव्याः। " इति मनसि विचिन्त्य दूषणः स्वस्य सेनाम् अवन्तीनगर्याः उपरि आक्रमणं कर्तुम् आदिष्टवान् ।

नगरजनाः " इदानीं वयं किं कुर्मः? " इति वेदप्रियं पृष्टवन्तः। सः उक्तवान् , " अस्माकं महती सेना नास्ति। असुरेण सह युद्धं कर्तुं वयम् असमर्थाः। केवलं भगवान् शिवः अस्माकं रक्षणं कर्तुं शक्नोति " इति । अतः सर्वे शिवध्याने मग्नाः अभवन् । क्रोधेन यदा दूषणः तान् हन्तुं समीपम् आगतः तदा यस्य पार्थिव-शिवलिङ्गस्य पूजां ते कुर्वन्तः आसन् तत् अभितः भूमौ महान् गर्तः अभवत् तथा तस्मात् शिवस्य  रौद्ररूपम् उद्भूतं येन  केवलं  हुङ्कारेण दूषणः भस्मीकृतः तथा दूषणस्य सेनायाः अनेके असुराः मारिताः। अन्ये केचन ततः पलायितवन्तः ।




शिवस्य एतं रौद्ररूपं जनाः ' महाकालः ' इति नाम्ना पूजयन्ति । दूषणः यदा हतः तदा देवाः अनेकविधान् दिव्य-वाद्यान् वादयन्तः तस्योपरि पुष्पवृष्टिं कृतवन्तः। " भक्तजनानाम् उद्धाराय अत्र एव तिष्ठतु " इति प्रार्थितः शिवः तस्मिन् महति गर्ते  भव्य-लिङ्गरूपेण ' महाकालः शिवः इति नाम्ना स्थितवान् । वेदप्रियः तस्य पुत्राः च शिवानुग्रहेण मोक्षं प्राप्तवन्तः । महाकालेश्वरः अद्यापि सर्वेषां भीतिं निराकरोति । भक्तानाम् इष्टसिद्धिः अपि भवति ।


(श्रीचित्रापुरमठस्य '**परिज्ञान-फौण्डेशन**' द्वारा प्रकाशितात्  '**शिवसायुज्यम्-60 Stories of Shiva**' इति पुस्तकात् अनुवादितम् ।)

## बालरञ्जनी

# शब्दपटः

– सुधा कार्नाड , बेङ्गलूरु



**उपरिष्टात् अधः -**

१) दूषणः एकः _____ आसीत्।

३) अवन्तीनगरी उज्जैनी इति ____ अस्ति।

४) अवन्तीनगरीं जनाः ____ इति वदन्ति।

६) महाकालः दूषणं ____ भस्मीकृतवान्।

७) अवन्तीनगर्यां स्थातुं भक्तैः महाकालः __।

८) महाकालेश्वरस्य प्रार्थनया भक्तानाम् ____ भवति।

**वामतः दक्षिणम् -**

१) वेदप्रियः_____इति नगर्याम् उषितवान् ।

२) वेदप्रियस्य रक्षणार्थम् एषः आगतवान्।

३) तस्य भटैः असुरं प्रति भीतिः _____।

४) महाकालः गर्तात् _____।

५) आज्ञां दत्तवान् इत्यस्य अन्य शब्दः।

( उत्तराणि अन्तिम-पृष्ठे दत्तानि )

# मुग्धानुरागः

**– दीपा चन्दावरकर , कोल्हापूर**

कैलासपर्वते एकदा बालगणेशः प्रीत्या स्वमातुः दिव्यतेजसा युक्तम् अनुपमसौन्दर्यं पश्यन् आसीत् । ततः सः शिवस्य समीपं गतवान् । तम् अवलोक्य सः चिन्तितवान् , " अहो ! मम पितुः रूपं तु कियत् रूक्षं विलक्षणञ्च ! शरीरे भस्म , शिरसि जटाजूटः , कण्ठे सर्पाः, वक्षःस्थले मुण्डमाला । " सः विनयपूर्वकं पितरम् अवदत् – " हे पितः ! मम माता तु लावण्यवती ! भवतः रूपं तु तस्याः अनुरूपं न दृश्यते । कृपया भवान् अपि सुन्दरं रूपं धारयतु ।"

पुत्रस्य प्रेम्णा प्रेरितः शिवः स्नानं कृत्वा दिव्यरूपेण प्रादुरभवत्। सुवर्णप्रभया युक्तं तस्य शरीरं , मृदवः सुशोभितकेशाः , कण्ठे सुगन्धितपुष्पमालाः ... एतत् मनोहारी रूपं दृष्ट्वा विस्मिताः देवाः गन्धर्वाः च आनन्देन शिवस्य उपरि पुष्पवृष्टिं कर्तुम् आरब्धवन्तः। गणेशः अपि स्तब्धः अभवत् । किन्तु अपरे क्षणे एव तस्य नेत्रद्वयम् अश्रूपूर्णम् अभवत् । शिवः स्नेहेन पृष्टवान् – " वत्स! किमर्थं रोदिषि ? "

गणेशः अवदत् – " हे पितः ! अधुना तु भवान् मातुः अपेक्षया अधिकः रूपशाली दृश्यते । किन्तु रूपसौन्दर्ये मम माता श्रेष्ठतमा भवेत् इति मम इच्छा । अतः कृपया स्वस्य पूर्वरूपम् एव धारयतु। भस्म-जटा-सर्पादयः अपि मम प्रियाः एव । "

गणेशस्य मातृप्रेमपूरित-वचनं श्रुत्वा शिवः मन्दस्मितं कृत्वा पुनश्च तस्य भस्मचर्चित-जटाधारि-सर्पभूषितञ्च रूपं धारितवान् । पितरं तस्य पूर्वरूपे दृष्ट्वा हृष्टः गणेशः प्रीत्या तम् आलिङ्गितवान् ।

## हास्यकणिका

**– अर्चना बसरूर , मुम्बई**



एकः यात्रिकः बसयानम् आरूढवान् ।
यात्रिकः – वाशी-बस-आगारं गन्तव्यम् । चिटिकाद्वयं ददातु ।
बसवाहकः – (आश्चर्येण) भवान् तु एकः एव । किमर्थं चिटिकाद्वयम् ?
यात्रिकः – यदि एका चिटिका नष्टा भवति तर्हि अपरा चिटिका भवेत् इति मम अभिप्रायः ।
बसवाहकः – अपरा चिटिका अपि नष्टा भवेत् चेत् ?
यात्रिकः – भोः , अहं मन्दमतिः न। तदर्थम् अपि मम समीपे उपायः अस्ति। मम कोषे यात्रायाः मासिक-प्रवासपत्रम् (monthly pass) अस्ति ।

रुचिरा

# सुरनोळी
( मधुकोषः)

– पूर्णिमा कोड्कणी , कोल्हापूर



## साहित्यम्

१. तण्डुलाः - त्रिचषकमिताः

२. घर्षितनारिकेलम् - अर्धचषकमितम्

३. चूर्णितगुडः - चषकद्वयमितः

४. दुग्धम् - अर्धचषकमितम्


५. पृथुकाः - १.५ चषकमिताः

६. हरिद्राचूर्णम् - लघु-चमसद्वयम्

७. लवणम् - स्वादानुसारम्

८. तक्रम् - तण्डुल-निमज्जनार्थम्

९. तैलम् - भर्जनार्थम्



## कृतिः

१. तण्डुलान् प्रक्षाल्य पर्याप्ते तक्रे पञ्च-षट् होराः यावत् निमज्जयन्तु।

२. सिक्त-तण्डुलान् घर्षितनारिकेलेन सह पेषयन्तु।

३. मिश्रणं सूक्ष्मं पिष्ट्वा यदा मृदु भवति तदा पृथुकान् , हरिद्राचूर्णं , गुडं लवणं च तस्मिन् योजयित्वा पुनः पेषयन्तु।

४. यदि आवश्यकता अस्ति तर्हि अवशिष्टं तक्रं योजयन्तु।

५. पात्रम् आच्छाद्य आरात्रं किण्वनार्थं स्थापयन्तु।

६. तप्त-समभ्राष्ट्रपात्रे अल्पं तैलं लेपयन्तु।

७. दर्व्याः साहाय्येन तप्त-समभ्राष्ट्रपात्रे सम्भारं (batter) गोलाकारे किञ्चित् स्थूलं प्रसारयन्तु।

८. अपूपम् आच्छाद्य मन्दाग्नौ केवलम् एकतः भर्जयन्तु।

९. यदा मधुकोषः इव छिद्राणि दृश्यन्ते तदा परिवेषयितुं सिद्धा भवति स्वादिष्टा सुरनोळी ।

१०. सुरनोळी नवनीतेन सह वा घृतेन सह वा आस्वादनीया ।

# वार्ता गीर्वाणप्रतिष्ठातः

**– सङ्कलनम् - सङ्गीता पवार**

**अस्मिन् त्रिमासकालावधौ गीर्वाणप्रतिष्ठया आयोजितानां कार्यक्रमाणां सङ्क्षिप्तः वृत्तान्तः अत्र प्रस्तुतः।**

जूनमासस्य द्वादशदिनाङ्के गीर्वाणवैखरी-पाठ्यक्रमस्य एकोनविंशतितमवर्गस्य समापनसमारोहः सम्पन्नः। गीर्वाणवैखरी-वर्गे छात्राः क्रीडा-प्रस्तुतीकरणमाध्यमेन पठन्ति । अतः तेषां कृते संस्कृतसम्भाषणं निःसङ्कोचं कर्तुं सुलभम् अभिरुचिपूर्णं च भवति । एतस्मिन् समारोहे गणस्य छात्राः एकां विनोदपूर्णघटनां तथा पौराणिककथाधारितम् एकं प्रसङ्गं नाट्यरूपेण प्रस्तुतं कृतवन्तः । तैः संस्कृतप्रश्नमञ्चः अपि प्रस्तुतीकृतः। एषः तु सर्वेषां कृते रोचकः अनुभवः आसीत् ।

**पूर्णिमा कार्नाड, बेङ्गलूरु**

---

प्रतिवर्षं जूनमासस्य १५ तमे दिनाङ्के गीर्वाणप्रतिष्ठया सञ्चालितासु परीक्षासु यशस्विभ्यः छात्रेभ्यः परमपूज्यस्वामिवर्याणां करारविन्दाभ्यां प्रमाणपत्राणि दीयन्ते। एतस्मिन् वर्षे १४ तमे दिनाङ्के कार्लानगरे आयोजिते कार्यक्रमे ९२ उत्तीर्णेषु छात्रेषु ८५ छात्राः स्वयमेव प्रमाणपत्राणि स्वीकर्तुम् उपस्थिताः आसन् । तथैव २५ गीर्वाणवैखरी छात्राः अपि प्रमाणपत्राणि स्वीकृतवन्तः ।

गुरुवर्याणां दिव्यहस्ताभ्यां पञ्च ज्येष्ठाध्यापिकाः शीला कळावर, संयुक्ता काय्किणी , सुनीला माविन्कुर्वे , अनुराधा कर्पे , विद्या येन्नेमिडी च सम्मानिताः अभवन् ।

**सुजाता हळदीपुर, मुम्बई**

---

बेङ्गळूरु नगरे गीर्वाणप्रतिष्ठायाः कार्यक्रमाः जुलै मासस्य द्वादशदिनाङ्के परमपूज्य-गुरुवर्याणां दिव्य-उपस्थितौ प्राचलन् । प्रथमं मराठीभाषायाः भाषान्तरितं " एषा एव प्रार्थना " इति गीतं शिक्षिकाः छात्राः च मिलित्वा वाद्यवृन्दस्य साहाय्येन माधुर्येण समगायन् । अनन्तरम् उदया माविनकुर्वे, रश्मी चन्द्रगिरि,सुनेत्रा नागरकट्टी, कुसुम अमलाडी च इत्येतासां चतसृणां सम्मानः गुरुवर्याणाम् अमृतहस्ताभ्याम् अभवत् । अन्ते गीर्वाणप्रतिष्ठायाः अनेकासु परीक्षासु उत्तीर्णाः त्रयोविंशतिः छात्राः प्रमाणपत्राणि गुरुवर्येभ्यः सानुग्रहं स्वीकृत्य कृतकृत्याः अभवन् ।

**अनन्तकृष्ण हिरेबेट् , बेङ्गळूरु**

# संस्कृतयोगः

**– शरयू हल्दीपुर , मुम्बई**

प्रतिवर्षं जूनमासस्य एकविंशतितमः दिवसः 'अन्तर्राष्ट्रीययोगदिवसः' इति रूपेण विश्वे समाचर्यते। एतस्मिन् सन्दर्भे मम मनसि एकः विचारः उदितः – यदि योगाभ्यासः शरीरं निरोगं मनश्च प्रसन्नं करोति, तर्हि किं न वयं ' संस्कृतयोगम् ' अपि आचरामः ?

योगः इति शब्दः केवलं शरीरव्यायामस्य वा आसनप्राणायामादीनां समूहस्य वा नाम नास्ति । योगः नाम सम्बन्धः , संयोगः, ऐक्यं च । यदा जीवः परमात्मना सह, मनः शान्त्या सह , मानवः संस्कृत्या सह वा सम्बध्यते , तदा योगः भवति । संस्कृतभाषा अपि एवं योगस्य माध्यमम् अस्ति । सा केवलं प्राचीना भाषा न , अपि तु भारतीयसंस्कृतेः , अध्यात्मविद्यायाः , शास्त्रपरम्परायाः च जीवनधारा अस्ति । यदा वयं संस्कृतभाषां शृणुमः , पठामः , वदामः , अनुभवामः च , तदा अस्माकं हृदयेषु तया सह आत्मीयः सम्बन्धः जायते। अयं सम्बन्धः एव ' संस्कृतयोगः ' इति कथ्यते ।

संस्कृतस्य अध्ययनं न केवलं

ज्ञानवृद्धये, अपि तु चित्तशुद्धये, विचारसौन्दर्याय, जीवनमूल्यानां संवर्धनाय च साहाय्यकरं भवति । सरलानि वाक्यानि , सुभाषितानि , स्तोत्राणि , श्लोकाः , सम्भाषणम् इत्यादीनि अस्मान् शनैः शनैः भाषायाः समीपम् आनयन्ति । यदा वयं संस्कृतेन सह जीवनस्य प्रत्येकक्षणं सम्बध्नुमः, तदा सा न काठिन्यपूर्णा भाषा इति दृश्यते , अपि तु स्नेहमयी , मधुरा , सुगमा च अनुभूयते । भाषायाः अयं स्नेहपूर्णः अनुभवः एव संस्कृतयोगस्य वास्तविकं स्वरूपम् अस्ति ।

अस्मिन् संस्कृतयोगे श्रीचित्रापुरमठस्य योगदानं विशेषतया उल्लेखनीयम् अस्ति। परमपूज्यैः श्रीमत्सद्योजातशङ्कराश्रमगुरुवर्यैः स्थापिता 'गीर्वाणप्रतिष्ठा' नाम संस्था संस्कृताध्ययनस्य, संस्कृतसम्भाषणस्य च प्रसारे श्लाघनीयं कार्यं निरन्तरं कुर्वती अस्ति । एतस्मिन् वर्षे जूनमासस्य चतुर्दशे दिनाङ्के कार्लामठे गीर्वाणप्रतिष्ठाप्रमाणपत्रवितरणसमये परमपूज्याः श्रीमत्सद्योजातशङ्कराश्रमस्वामिनः विद्यार्थिनः संस्कृतभाषया मञ्चे वक्तुं सस्नेहम् उत्साहितवन्तः। सः क्षणः बहूनां हृदयेषु 'उत्तिष्ठत जाग्रत' इत्यस्य सजीवमाह्वानमिव अभवत् । गुरोः प्रेरणया देवभाषा हृदये , चिन्तने , आचरणे, वचने च विराजताम्।एवं श्रीचित्रापुरमठः संस्कृतस्य माध्यमेन जनानां हृदयेषु संस्कृतयोगं प्रतिष्ठापयतु , येन ते न केवलं भाषां पठन्तु , अपि तु जीवन्तु , अनुभवन्तु च ।

**उत्तिष्ठत, संस्कृतं वदत, संस्कृतं जीवत क्षणे क्षणे ।**
**गुरुकृपाप्रसादेन, हृदयेषु विराजतां जने जने ॥**

**चिन्तने वचने कर्मणि सर्वदा भातु संस्कृतम् ।**
**संस्कृतयोगसंयुक्तं जीवनं भवतु सार्थकम् ॥**

मङ्गलं तावत् ।

## उत्तराणि

### शब्दपटः

**वामतः दक्षिणम् –** १) अवन्ती २) महाकालेश्वरः ३) प्रसारिता ४) उद्भूतः ५) आदिष्टवान्
**उपरिष्टाद् अधः –** १) असुरः ३) प्रख्याता ४) उजैनी ६) हुङ्कारेण ७) प्रार्थितः ८) इष्टसिद्धिः

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति ।**
**पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code
for Enquiry Form